International Journal of Sanskrit Research 2018; 4(2): 19-21

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2018; 4(2): 19-21
© 2018 IJSR
www.anantaajournal.com
Received: 05-01-2018
Accepted: 06-02-2018

**मञ्जुदत्त**
विद्यावारिधिशोधछात्रा,गौडव ङ्गविश्वविद्यालयः, मालदा, पश्चिमवङ्गः।

# टीकाकारः लौगाक्षिभास्करस्य प्रकाशटीकायां न्यायसिद्धान्तमञ्जर्याविषयावबोधने कारकव्याख्या

**मञ्जुदत्त**

**प्रस्तावना**

भास्करः लौगाक्षिभास्करो वा - लौगाक्षिभास्करविरचितग्रन्थानाम् *अर्थसंग्रहः* प्रकाशितग्रन्थो भवति। स मीमांसाविषयकग्रन्थो भवति। *अर्थसंग्रहग्रन्थस्य* प्रणेता भास्करः लौगाक्षिभास्करः वा एतस्मिन् विषये संशयमस्ति। प्रचलितमतानुसारं यतः *अर्थसंग्रहग्रन्थस्य ग्रन्थकारः* लौगाक्षिभास्करो भवति। अतः अस्यापि ग्रन्थस्य रचयिता लौगाक्षिभास्करः इति एवं मन्यते। New Catalogus Catalogorum, Vol-26. - इति ग्रन्थानुसारं *अर्थसंग्रहः* तथा *न्यायसिद्धान्तमञ्जरीप्रकाश* इति द्वयो-ग्रन्थयोः रचयिता लौगाक्षिभास्करो भवति।

*अर्थसंग्रहः* ग्रन्थस्यान्तिमे सः स्वस्य नाम भास्करः एवमलिखत्। अतः एवं मन्यते लौगाक्षि तस्य पितुः पारिवारिकः नाम वा भवति। लुक् + क्विप्, यत् लुप्तः अभवत्। लुक् + अच् = लुकः लुपो वा भवति। लुके अक्षिणी यस्य = लुगाक्षः। लुगाक्षस्य अपत्यम् इत्यर्थे लुगाक्ष + इञ् = लौगाक्षिः। वाच्यार्थे नष्टचक्षुषः पुत्रः लक्ष्यार्थे विद्यारूपः चक्षुहीनस्य पुत्रः। वाच्यार्थः लक्ष्यार्थः वा कस्य ग्रहणं प्रयोज्यम्, एकस्य उभयोः ग्रहणं वा एतस्य निर्णयं दुष्करमेव भवति। मीमांसादि विविधविषये तस्य पाण्डित्यं सूर्य इव, एतद् कारणवशात् तस्य नाम भास्करः एवं मन्यते। पूर्वोक्तकारणवशात् शब्दद्वयं मिलित्वा लौगाक्षिभास्करः इति प्रसिद्धः अभवत् एवं समालोचकाः विद्वद्जनाः अनुमित्वा वदन्ति।

लौगाक्षिभास्करस्य आनुमानिकः समयः षोडशशताब्दी भवति।[1] *अर्थसंग्रहस्य* मङ्गलश्लोके वासुदेवः रमा नामद्वयं गृहीत्वा समालोचकानां संशयमस्ति। कोऽपि अवदत् नामद्वयं तस्य पितरौ नाम, कोऽपि गुरु-गुरुपत्न्योः नाम, कोऽपि वा अवदत् लौगाक्षिभास्करः भगवान् विष्णोपासक आसीत्, स पाञ्चरात्रसम्प्रदायस्य वैष्णव वा भवति। अध्यापकः कीथमहोदयः अवदत् लौगाक्षिभास्करस्य पितुर्नाम मुद्गलः भवति।[2] एवञ्च New Catalogus Catalogorum इति ग्रन्थस्य षडविंशखण्डानुसारं लौगाक्षिभास्करस्य पितुर्नाम मुद्गलभट्टः पितामहस्य नाम रुद्रभट्टो भवति इति उक्तम्।

**Correspondence**
**मञ्जुदत्त**
विद्यावारिधिशोधछात्रा,गौडव ङ्गविश्वविद्यालयः, मालदा, पश्चिमवङ्गः।

---

[1] वाचस्पतिः उपाध्यायः, *अर्थसंग्रहः*, चौखम्भा ओरियेन्टालिया, 1st ed-1977.

[2] डा. गुरुशङ्करः मुखोपाध्यायः, *अर्थसंग्रहः*, संस्कृतः वुकः डिपो, 1st ed-2005.

जानकीनाथशर्मा - श्रीमान् जानकीनाथचूडामणिभट्टाचार्यस्यानुमानिककालः 1550 शताब्दी[3] 1490 – 1515 शताब्दी वा भवति।[4] स वङ्गस्थ नवद्वीपनिवासी नैयायिक आसीत्। जानकीनाथभट्टाचार्यमहाशयस्य पुत्रद्वयमासीत् राघवपञ्चानन – रामभद्रसार्वभौमश्च। रामभद्रसार्वभौमस्यापि आनुमानिककालः षोडशशताब्दी भवति। श्रीमान् जानकीनाथशर्मामहाशयस्य जानकीनाथभट्टाचार्यः चूडामणिभट्टाचार्यः चिन्तामणिभट्टाचार्यः जानकीनाथचूडामणिभट्टाचार्यः श्रीनाथः आचार्यः चूडामणिः इति नामानि अपि प्रसिद्धो भवति।

जानकीनाथशर्मनः पितुर्नाम श्रीकराचार्यो भवति। लौगाक्षिभास्करकृतः न्यायसिद्धान्तमञ्जरीप्रकाशः श्रीमान् जानकीनाथशर्माविरचितः न्यायसिद्धान्तमञ्जर्यामेकः टीकाग्रन्थो भवति।

**न्यायसिद्धान्तमञ्जरी -** न्यायसिद्धान्तमञ्जरी जानकीनाथभट्टाचार्यचूडामणिविरचितः। अयं ग्रन्थन्यायविषयको भवति। भारतवर्षस्य सर्वत्र अयं ग्रन्थः प्रचारमलभत्। आश्चर्यमेकं वङ्गे अस्य ग्रन्थस्य प्रचारं तादृशं नासीत्। वङ्गबहिस्थ काश्यादिविद्यास्थाने नव्यन्यायशास्त्राभ्यासकाले अस्य ग्रन्थस्य प्रत्यक्षादिखण्डमधिकृत्य पाठारम्भः अभवत्। न्यायदर्शनस्य प्रमाणांशमुत्सीकृत्य ग्रन्थः अयं विरचितो भवति। प्रत्यक्ष-अनुमान-उपमान-शब्दः इति परिच्छेदचतुष्टयकमयं ग्रन्थः समाप्तो भवति। न्यायसिद्धान्तमञ्जरी बहुवारं पुनर्मुद्रितः अभवत्। काश्यां 1941 – 43 शताब्दे यत्मुद्रणमभवत् तस्य चित्रादिकं संग्रहं कृत्वाहं कार्यं करोमि। श्रीमतः जानकीनाथशर्मनः महाशयस्य मणिमरीचिः. तात्पर्यदीपिका, आत्मतत्त्वदीपिकादयः ग्रन्थाः सन्ति। पुत्ररामभद्ररचितः न्यायरहस्येन सह संयुक्तरुपेण आन्वीक्षिकीतत्त्वविवरणम् नाम अपरापरं ग्रन्थमस्ति।

**न्यायसिद्धान्तमञ्जरीप्रकाशः -** लौगाक्षिभास्करस्य बहुषु ग्रन्थेषु न्यायसिद्धान्तमञ्जरीप्रकाशः अन्यतमो भवति। श्रीमतः जानकीनाथभट्टाचार्यमहोदयस्य न्यायसिद्धान्तमञ्जर्यामुपरि इह एकः अप्रकाशितः टीका भवति। यथा न्यायसिद्धान्तमञ्जर्यां प्रत्यक्षादि परिच्छेदचतुष्टयमस्ति तथैव अस्मिन् ग्रन्थे अपि अस्ति। प्रकाशितः मीमांसाशास्त्रविषयकः ग्रन्थः अर्थसंग्रहः यथा नवीनपाठार्थीनां कृते उपयोगि भवति तथैव अयं ग्रन्थः न्यायशास्त्रविषये सुवोध्यः सहजः सरलरुपेणोपयोगि भवति। न्यायसिद्धान्तमञ्जरी इति ग्रन्थः भारतबर्षस्य सर्वत्र प्रचारलाभमकरोत् एतद्विषयः न्यायसिद्धान्तमञ्जरीप्रकाशस्य पाण्डुलिपिं दृष्ट्वा अवबुध्यते। भारतवर्षस्य दक्षिणाञ्चले, दक्षिण – पश्चिमाञ्चले, पूर्वाञ्चले, दक्षिण – पूर्वाञ्चले अस्य ग्रन्थस्य पाण्डुलिपिः अस्ति। एतद्व्यतिरिक्तः विदेशे अपि न्यायसिद्धान्तमञ्जरीप्रकाशस्य पाण्डुलिपिः उपलभ्यते। एतद् दृष्ट्वा न्यायसिद्धान्तमञ्जरी - न्यायसिद्धान्तमञ्जरीप्रकाशस्य च जनमनसि कीदृशः प्रभावः आसीत् अनुमीयते।

**न्यायसिद्धान्तमञ्जरी**

चात्ममनः संयोग आत्मजन्यः आत्मजन्यज्ञानजनकश्चेति चेत्। स्यादेव। उपाधीनां करणत्वादीनां भेदाच्च व्यहारभेदः। अतएव विवक्षातः कारकविभक्तयो नानाभवन्तीति शाब्दिकाः।

**न्यायसिद्धान्तमञ्जरीप्रकाशः**

ननु ज्ञानं प्रत्यात्मा यदि करणं तदा तत्र कर्तृत्वव्यवहारो न स्यादित्यतस्तत्राह। उपाधिनामिति। तथा च तत्तद्व्यवहारे व्यवहर्तव्यतावच्छेदक भेद एव तत्र। न तु व्यवहर्तव्यभेदः। अन्यथैकत्र पुंसि पाचकपाठकादिव्यवहारभेदो न स्यादिति भावः।

अतएवेति। यतः कर्तृत्वाद्युपाधिभेदे नियामकोऽतएवैकत्रापि तत्तत्कारकविवक्षावशात् तत्तत्कारकविभक्तयो नाना भवन्तीति शाब्दिकमतमपि संगच्छत इत्यर्थः। यथा स्थाली पचती स्थाल्यां पचतीत्यादि। तत्र क्रियां कुर्वद्धि कारकमिति योगात् क्रियाहेतुः कारकमिति लक्षणं लक्ष्यते। अतएव राज्ञः

[3] New Catalogus Catalogorum, Vol – 7, k. Kunjunni Raja, University of Madras, Sanskrit Series – 32, 1973.

[4] वाङ्गालीर सारस्वत अवदान – वङ्गे नव्यन्यायचर्चा, दीनेशचन्द्र भट्टाचार्यः, वङ्गीय साहित्य परिषद, कलि -6। पृ-107

पुरुष इत्यादौ षष्ठी न कारकविभक्तिः। तदर्थ सम्बन्धस्य क्रियाहेतुत्वाभावात्। अतएव सम्बन्धस्य षष्ठी शेष इति सूत्रेण कारकभिन्नत्वलक्षणं शेषत्वं दर्शितम्। तच्च षोढा। तदुक्तम् -

कर्ता कर्म च करणं संप्रदानं तथैव च ।
अपादानाधिकरणं च इत्याहुः कारकानि षट्।

तत्र क्रियानुकूलकृतिमान् कर्ता। स्वतन्त्रः कर्तेति सूत्रे स्वतन्त्रमप्येतदेवेति न तद्विरोधः। चैत्रस्तण्डुलान्पचतीत्यादौ चैत्रादेस्तादृशकृतिमत्वन्मुख्यकर्तृत्वम्। अचेतने कर्तृप्रयोगो गौण एव। घटो भवति घटो नश्यतीत्यादौ घटो भवनाश्रयः। घटो नाश प्रतियोगीत्यर्थबोधात्। परसमवेतक्रियाजन्यफलाश्रयः कर्म। प्रागुक्तप्रयोगे तण्डुलादेः पाकजन्य विक्लतिमत्वात्कर्मत्वम्। चैत्रो ग्रामं गच्छतीत्यादौ चैत्रादावतिव्याप्तिवारणाय परसमवेतेति क्रियाविशेषणम्। कर्तुरीप्सिततमं कर्मेति सूत्रस्यापि कर्तुक्रियाजन्य फलवत्तया यदिष्टतमं तत्कर्मसंज्ञकमित्यर्थः। ननु तद्विरोधः। घटं जानातीत्यादौ घटादेर्ज्ञानविषयत्वं कर्म गौणम्। साधकतमं करणम्। एतत्प्रपञ्चो मूल एव सुव्यक्तः। क्रियाकर्मीभूतवस्तुनिष्ठस्वत्वभागित्वेनोद्देश्यः सम्प्रदानम्। तथा च सूत्रम्,- कर्मणा यमभिप्रैति स सम्प्रदानमिति। कर्मणा कर्मजन्यफलभागित्वेन अभिप्रैति उद्देश्यीकरोति। यथा विप्राय गां ददाति। राज्ञे दण्डं ददातीत्यादौ विप्रादिः दानेन गवादौ यजमानस्वत्वनिवृत्तौ विप्रादेः स्वत्वोत्पादात्। गोनिष्ठस्वत्वभागित्वे विप्रोद्देश्यकगोकर्मकदानकर्ता चैत्र इति बोधः। वृक्षायोदकं सिञ्चतीत्यादौ न सम्प्रदानचतुर्थी। कर्मीभूतोदकजन्यवृद्धिभागित्वेन वृक्षस्योद्देश्यत्वा तादृशोद्देश्यत्वे लाक्षणिकीति नानुपपत्तिः। नमस्वस्त्यादियोगेऽपि न सम्प्रदानचतुर्थी। किन्तूपपदविभक्तिः सम्बन्धार्थिकैव। नारदाय रोचते कलह इत्यदावपि रूच्यर्थानां प्रीयमाण इति सूत्रेण बोधिता चतुर्थी उपपदविभक्तिरेव। नारदीयरुचिविषयः कलह इत्यर्थः। परसमवेतक्रियाजन्यविभागाश्रयोऽपादानम्। तथाच सूत्रम्- ध्रुवमपायेऽपादानमिति। अपाये विभागे। ध्रुवं निश्चलं परसमवेतक्रियाजन्यविभागाश्रय इत्यर्थः। भूभृतो गङ्गावतरतीत्यादौ भूभृतो गङ्गासमवेतक्रियाजन्यविभागाश्रयत्वादपादानत्वम्। गङ्गायामतिव्याप्तिवारणाय परसमवेतेति क्रियाविशेषणम्। वृक्षाद्विभजते फलमित्यादौ तु नापादाने पञ्चमी। किन्त्ववधौ वृक्षाधिकविभागाश्रयः फलमिति बोधात्। अवधित्वं स्वरूपसम्बन्धविशेषः। कर्तृकर्मान्यतरद्वारा क्रियाश्रयोधिकरणम्। आधारोऽधिकरणमिति सूत्रस्य तदर्थपरतया शाब्दिकैर्व्याख्यानात्। अन्यथा सम्भवापातात्। गेहे चैत्रः स्थालयामोदनं पचतीत्यादौ गेहस्य कर्तृद्वारा स्थालयाश्च कर्मद्वारा क्रियाश्रयत्वादधिकरणत्वम्। इत्थं च गेहे घट इत्यादौ क्रियापदाध्याहारेणैवाधिकरणत्वबोध इति वैयाकरणाः।

वस्तुतस्तु अधिकरणत्वमाधेयत्वमपि सप्तम्यर्थः। तेन गेहे घट इत्यादौ क्रियापदं विनापि गेहाधेयत्ववान् घट इति बोधो नानुपपन्न इति तार्किक पन्थाः। चर्मणि द्विपिनं हन्तीत्यादौ तु निमित्तसप्तमी उदेश्य त्वार्थिक। चर्मोद्द्श्यकद्विपिकर्मकहननकर्तेति बोधः। घने वर्षति चौर आयात इत्यादौ तु भावसप्तमी। समानकालीनत्वार्थिक। घनवृष्टिसमानकालीनागमनाश्रयश्चोर इति बोधः। क्वचिद्देशिकसामानाधिकरण्यार्थिकापि। द्रव्यकर्मान्यत्वे सति सामान्यवान् गुण इत्यादौ द्रव्यकर्मान्यत्वसमानाधिकरण सामान्यवानित्यर्थ इत्यलमति विस्तरेण।

**References**


1. Bhattacharya. Dinesh Bangalir saraswata Abadan - bange navya nyaya charcha, Bangiya Sahitya Parisad, kol-6, 1951.
2. Chakraborty. Rai Monmohan History of Navya Nyaya in Bengal and Mithila, Journal of the Asiatic Society, 1915; XI:259-292, Kolkata.
3. Das Karunasindhu, Basu Ratna. Aspects of Manuscriptology, The Asiatic Society, Kolkata-2005.
4. Dash. Siniruddha New Catalogus Catalogorum, University of Madras, 2011-2013, 24-26.
5. Goswami. Subuddhi Charan Editing of Nyaya Texts from Mss. Sources, Journal of the Department of Sanskrit, Rabindra Bharati University, Kol-50, Viii:65-77.
6. Mukhopadhay. Gurusankar Arthasangraha, 1st ed Sanskrita Book Dipo, Kol-6, 2005.
7. Raja Kunjunni K. New Catalogus Catalogorum, University of Madras, Sanskrit series. 1973; 7:32.
8. Vargananda. Arthasangraha, 1st ed 1411 bangabda, Sanskrita Pustak Bhandar, Kol -6.